Declaration

# प्रतिज्ञापत्रम्

SMT. HANSA MEHTA LIBRARY
The M. S. University of Baroda



कश्यपस्य संहितायाः सम्पादनपूर्वकमध्ययनस्य महाशोधप्रबन्धस्य मुख्यो विषयः। तदर्थं प्राच्यविद्यामंदिरस्थानां त्रिसृणां, पुनानगरस्य एकस्याः, कश्मीरनगरस्यैकस्याः, एवं मिलित्वा पञ्च मातृकाणामाधारेण कश्यपसंहितायाः पाठनिर्धारणं प्रथममेव कृतम्। अन्यज्योतिषशास्त्रीयग्रन्थेषु( बृ.सं.भटोत्पलटीका, मुहूर्तचिन्तामणेः पीयूषधाराटीका, बल्लालसेन- प्रणीतोऽद्भुतसागरः) काश्यपसंहितायाः श्लोका उद्धरणरूपेण प्राप्यन्ते । तेषामपि सङ्ग्रहः पाठनिर्धारणे समुपयोगश्च कृतः।

अत्र शपथपूर्वकमुद्घोष्यते यत्-अस्मिन् महाप्रबन्धे मया विविधानां प्रकाशिताप्रकाशितानां मूलभूतानां तथा चाधारग्रन्थानां ग्रन्थकाराणां, पुस्तकानां लेखकानां कोशग्रन्थानां च प्रमाणभूतायाः सामग्र्याः सम्यक्तया विवेकबुद्ध्या सुयोग्यस्थानेषु समुपयोगः कृतः, तस्य यथास्थाने सन्दर्भग्रन्थसूच्यां टिप्पण्यां च ऋणनिर्देशः कृतोऽस्ति। तथापि महाप्रबन्धे सर्वं मम प्रतिपादनं, निष्कर्षा निर्णयाश्च सम्पूर्णतया मौलिकाः स्वकीयाश्च सन्ति। एतादृशमध्ययनं न केनाप्यद्यावधि विहितमिति मम संशोधनं नावीन्यपूर्णं ज्ञानवर्धकं चास्तीति सविनयं-हृदयपूर्वकं निवेद्यते ।

स्थानम्

वडोदरा

(दीपककुमार लक्ष्मीशङ्कर आरम्भडिया)

**संशोधनकर्ता**